International Journal of Sanskrit Research 2017; 3(4): 16-18

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(4): 16-18
© 2017 IJSR
www.anantaajournal.com
Received: 05-05-2017
Accepted: 06-06-2017

**Amritava Das**
University- Calcutta University College- Ramakrishna Mission Vidyamandira Belur Department - Sanskrit Department State – West Bengal, India.

**Correspondence**
**Amritava Das**
University- Calcutta University College- Ramakrishna Mission Vidyamandira Belur Department - Sanskrit Department State – West Bengal, India

# कालिदासनाट्यकृतिषु उद्दीपनविभावरूपेण चित्रिताः वनस्पतयः

**Amritava Das**

काव्यसात्मा स एवार्थस्तथा चादिकवेः पुरा
क्रौञ्चद्वन्द्ववियोगत्थः श्लोकत्वमागतः (ध्वन्यालोकः १,५)
काव्ये रस एव मुख्यस्तेनैव सहृदयमनांसि प्रीतिमाप्नुवन्ति।स च रसः कथं परिपुष्टो भवतीति वर्णयन् भरताचार्येणोदितम्

‘ विभावानुभावसंचारिसंयोगादरसनिष्पत्तिः
तस्यैव मतं प्रतिपादयन् दशरूपककारोऽपि भवति
विभावैरनुभावैश्च सात्विकैव्यभिचारिभिः
आनीयमानः स्वाद्यत्वं स्थायी भावो रसः स्मृतः (दशरूपक ४,१)

रसहीनभावस्य भावहीनरसस्य वा स्थितिरकल्पनीयास्ति।यदि विभावादयः सामाजिकानां सम्मुखं न तिष्ठन्ति तदा तेषु रसानुभूतिरिति न दृश्यते।यथा चोक्तम् भरतमुनिना -

न भावहीनोऽस्ति रक्षे न भावो रसवर्जितः
परस्परकृता सिद्धिस्तयोरभिनये भवेत् (नाट्यशास्त्रम ६,३७)

वस्तुतः कविगतो रस एव काव्ये विभावादीनां वर्णने कारणं भवति।अतएव नाट्यशास्त्रस्य षष्ठाध्यायस्य भरतेन भणितम् -

न हि रसादृते कश्चिदर्थो प्रवर्तते ।

अत्र ‘रस’ इति पदेन कविगतो रसः परिलक्ष्यते यथा चोक्तमभिनवगुप्तेन तदेव मूलवीजस्थानीयः कविगतो रसः।

अपारे काव्यसंसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते।।
शृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत्।
स एव वीतरागश्चेत् नीरसं सर्वमेव तत्।। (ध्वन्यालोकः ३,४२ )

इत्थं स्पष्टं यद् काव्ये वर्णिता विभावादयः कविगतोभावानामेव प्रदर्शनं भवन्ति येषां ग्रहणं सहृदयेन काव्यमाध्यमेन क्रियते ।यथा चोक्तम् अभिनवगुप्तपादाचार्येन -

अपूर्वं यद्वस्तु प्रथयति विना कारणकलां
जगद् ग्रावप्रख्यं निजरसभरात् सारयति च
क्रमात् प्रख्योपाख्याप्रसरसुभगं भासयति तत्
सरस्वत्यास्तत्वं कविहृदयाख्यं विजयते
ध्वन्यालोकलोचनस्य मंगलाचरणम् ।

काव्ये विभावाः कविव्यापाराश्रिताः भवन्ति ।रामदुष्यन्तादीनां कविनिर्मितं रूपमेव शव्दमाध्यमेन सहृदयानां सम्मुखमायाति।अतएव काव्ये वर्णिताः विभावाः अनपेक्षितवाह्यसत्वाः भवन्ति।यथा चोक्तं धनिकेनावलोकटीकायाम् -
“अमीषां चानपेक्षितबाह्यसत्वानां शव्दोपधानादेवासादिततद्भावानां सामान्यात्मनां स्वस्वसम्बन्धित्वेन विपरिवर्तमानानामालम्बनादिभावः।(दशरूपकस्यावलोकटीका- चतुर्थप्रकाशः)
रसानुभूतेः कारणं विभावः एव।विभावमेवाश्रित्य वाचिकमाङ्गिकं सात्विकञ्चाभिनयस्तिष्ठति।यथा चोक्तं भरतमुनिना -

“बहवोऽर्थो मविभाव्यन्ते वा गंगाभिनयाश्रयाः
अनेन यस्मात्तेनायं विभाव इति संज्ञितः
(नाट्यशास्त्रम् - ७.४)

विभाव एव काव्ये परिज्ञातो भवति।तेनैव स्थायिसञ्चार्य्यादिभावानां परिपुष्टिर्भवति।अतएव धनञ्जयेन विभावस्य लक्षणमित्थं कृतम् -

ज्ञायमानतया तत्र विभावो भावपोषकृत्
आलम्बनीद्दीपनत्वप्रभेदेन स च द्विधा (दशरूपक - ४,२)

कविः स्वीये काव्ये रसस्य परिपुष्ट्यर्थं रामदुष्यन्तादीनामालम्बनविभावानां स्वरूपं विविधचेष्टावर्णनपूर्वकं प्रदर्शयति।परं तेनैव तस्य कार्यं न परिसमाप्यते यतो हि यावात्पर्यन्तं तत् तत् रसापुष्ट्ये अनुकूलवातावरणस्य
महाकविकालिदासेनापि सुष्ठुरूपेण स्वनाट्येषु प्रक्रितेरेतानि तत्त्वानि क्वचित् चेतनवत् क्वचिच्चातेनवत् वर्णितानि,विशिष्टरूपेण वनस्पतयोऽतीवचारुतयाभिमतरसपुष्ट्ये वर्णिताः सन्ति।अभिज्ञानशाकुन्तलस्य प्रथमाङ्के अङ्गीरसस्य शृङ्गारस्य परिपुष्टिरेव कवेरभिमता वर्तते। प्रारम्भादेव कविरनुकूलवातावरणस्य सृष्टौ संलग्नौ दृश्यते। राजा दुष्यन्तः आश्रमपदमागतो वर्तते शकुन्तला च पादपान् सिञ्चती यदा नवमालिकालतां वनज्योत्स्नां सहकारवृक्षेणालिङ्गितां पश्यति तदा कथयति।“हला शकुन्तले रमणीये खलु काले एतस्य लतापादपमिथुनस्य व्यतिकरः संवृत्तः ।नवकुसुमयौवना वनज्योत्स्ना, बद्धपल्लवतयोपभोगक्षमः सहकारः ।(अभिज्ञानशकुन्तलम् प्रथमाङ्क )
नवमालिकासहकारवृक्षयोरणेन वर्णनेन कविः सहृदयेषु शृङ्गारस्योद्दीपनार्थमनुकूलमावरणं रचयति तथा च शकुन्तलादुष्यन्तयोः विवाहस्य पूर्वसूचनामपि प्रददाति।तस्मिन्नेव स्थले प्रियंवदायाः कथनमपि करेरभिमतं साधयति ।“हला शकुन्तले अत्रैव तावन्मुहूर्तं तिष्ठ, यावद् त्वयोपगतया लतासनाथ इवायं केसरवृक्षकः प्रतिभाति”(अभिज्ञानशकुन्तलम् १ अङ्क )।
एतच्छुत्वां दुष्यन्तस्य हृदये कोऽप्यलौकिको विचारः परिस्फुरति येन प्रेरितः सोऽपि शकुन्तलां लतेव पश्यति -
“अधरः किशलयरागः कोमलविटपानुसारिणी बाहु कुसुममिव लोभनीयं यौवनमङ्गेषु संनद्धम्” (अभिज्ञानशकुन्तलम् १/१९)

चतुर्थाङ्कात् प्राक् विष्कम्भके शकुन्तलयो विरहावस्थाजनितं दुःखं सहृदयेषु संप्रेषणीयं वर्तते।अतएव\ तत्र कुमुद्वती अपि स्वचेष्टया तमेव भावं संपेष्यति-

“अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीय शोभा
इष्टप्रवासजनितान्यबला जनस्य
दुःखानि नूनमतिमात्रसुदुःसहानि” (अभिज्ञानशकुन्तलम् ४.३)

चतुर्थाङ्के शकुन्तलां पतिगृह प्रेषणाय समुत्सुकं आश्रमपदं बन्धुजनविरहेण जनितकरुणयाप्लावितं दृश्यते।तत्र तु वनास्पतिदेवताः किमप्यलौकिकमाचरन्ति गम्यमानायाः कृते मातृवत् वस्त्राभरणं प्रयच्छति-

क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतं
निष्ठ्युतश्चरणोपभोगसुलभो लाक्षारसः केनचित्
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै
र्दतान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः
(अभिज्ञानशकुन्तलम् ४,५)

प्रथमाङ्के पादपान प्रति शकुन्तलायाः यः स्नेहः कारुण्यमेव जनयति।यथा च

“पातुं न प्रथमं व्यवस्यति युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्
(अभिज्ञानशकुन्तलम् ४,९)

शकुन्तलया प्ररुढा नीवारा अपि ऋषेः कण्वस्य दुःखं वर्धयन्ति-

> शममेष्यति मम शोकः कथं नु वत्से
> त्वया रचितपूर्वम्
> औटजद्वारविरूढं नीवारबलिं विलोकयतः (अभिज्ञानशकुन्तलम् ४,२१)

आगतेऽपि वसन्ते आम्रमञ्जरी पुष्पाणि चापि दुष्यन्तस्य विरहावस्थया दुःखितानि विकसितुं नेच्छन्ति। इत्थं कण्वस्याश्रमपदात् प्रारम्भ्य मारीचस्याश्रमपदं यावत् सर्वत्रैव वनस्पतयः करेरभिमतं भावमेवानुसरन्ति।निर्हेतुकतया लतापुष्पपादपानां वर्णनस्य अभाव एव दृश्यते कालिदासस्य नाट्येषु ।
विक्रमोर्वशीयस्य प्रारम्भे एव लता मित्रवदाचरन्ती राज्ञे अभीष्टसुखं प्रयच्छति -

> "प्रियमाचरितं लते त्वया मे रामनेऽस्याः क्षणविघ्नमाचस्त्या
> यदियं पुनरप्यपाङ्गनेत्रा परिवृत्तार्धमुखी मया हि दृष्टा (विक्रमोर्वशीयम् १,१८)

द्वितीयाङ्के वसन्तस्य प्रारम्भे पुरुरसा कृतं पुष्पमञ्जरीणां वर्णनमेतत् उर्वशीमुद्दिश्य तस्यानुरागमेव प्रदर्शयति सामाजिकान् च अनुरागयुक्तवान् करोति -

> "अग्रे स्त्रीनखपाटलं कुरवकं श्यामं द्वयोर्भागयो
> र्बालाशोकमुपोढरागसुभगं भेदोन्मुखं तिष्ठति
> इषद्बद्धरजः कणाग्रकपिशा चूते नवा मञ्जरी
> मुग्धत्वस्य च यौवनस्य च सखे मध्ये मधुश्रीः स्थिता (विक्रमोर्वशीयम् २,७)

प्रतीयते यद् वनस्पतिवर्णनं व्याजेन उर्वश्या मुग्धावस्थाएव वर्णिता वर्ततेऽत्र विक्रमोर्वशीयस्य चतुर्थाङ्के उपवने भ्रमण् विरहविधुरो राजा लतासु पुष्पेषु वृक्षेषु च सर्वत्र उर्वशीसाम्यं उर्वश्याः स्मृतिचिह्णं व्यावलोकयति-

> "आरक्तराजिभिरियं कुसुमैर्नवकन्दली सलिलगर्भैः
> कोपादन्तर्वाष्पे स्मरयति मां लोचने तस्याः (विक्रमोर्वशीयम् ४,५)

मालविकग्निमित्रस्य तृतीयाङ्के उपवने भ्रमण् राजा मालविकायां स्वानुरागकारणात् वनस्पतिष्वपि योषिच्छविरेवावलोकयति-

> "रक्ताशोकरुचा विशेषितगुणो बिम्बाधरालक्तकः
> प्रत्याख्यातविशेषकं कुरबकं श्यामावदातारुणम्
> आक्रान्ता तिलकक्रियापि तिलकैर्लग्नाद्वरेफफाञ्जनैः
> सावज्ञेव मुखप्रसाधनविधौ श्रीमाधवी योषिताम् (मालविकाग्निमित्रम् ३,५)

अपरतश्च अपूर्णमनोरथा मालविका यदा पुष्पविहीनमशोकवृक्षं पश्यति तदा तस्मिन् स्वीयां प्रतिच्छायामेव प्राप्नोति।यथा च - "अयं स ललितसुकुमार दोहदापेक्षी अगृहीतकुसुमनेपथ्यः उत्कण्ठिताया मम अनुकरोत्यशोकः" ।(मालविकाग्निमित्रम् ३ अङ्क)
मालविका यदा अशोकविकासयितृकं देव्या नियोगमनुतिष्ठति,अशोकवृक्षञ्च स्वपादेन ताडयति तदा कामिजनमिव राजा आत्मानं वञ्चितं मन्यमानः अशोकवृक्षमुपालभ्यते -

> "अनेन तनुमध्यया मुखरनूपुराराविणा
> नवाम्बूरुहकोमलेन चरणेन सम्भावितः
> अशोक यदि सद्य एव मुकुलैर्न सम्पत्स्यसे
> मुधा वहसि दोहदं ललितकामिसाधारणम्" (मालविकाग्निमित्रम् ३,७)

अत्र स्वोत्कण्ठावशात् अशोकवृक्षमपि कामिजनमिव पश्यति राजा।एतैरुदाहरणैः स्पष्टं यद् कालिदासेन स्वकीयेषु नाट्येषु स्वरचितपात्रानुवृत्यनुरुपायेव पादपलतापुष्पाणि विरचितानि अथवा कथयितुं शक्यते यत् प्रकृतिरपि पात्राणां मनोवृत्तिमनुसरति,अतएव एतेषु नाट्येषु उद्दीपनविभावानां चित्रणमतीव साकल्येन कृतं वर्तते । यद्यपि नाट्यानां प्रयोगावसरे ध्वनिप्रकाशवाद्ययन्त्रादीनां प्रयोगेन तत्तद्भावानामुद्दीपनं सम्भवं भवति परं कविकृतमिदं वर्णनं तत्र साहाय्यं विदधाति।अन्यच्च पठनसमयेऽपि सहृदयानां हृदयेषु तत्तद् भावानां सञ्चरणं सहजातयैव भवति।अतएव आनन्दवर्धनचार्येण यदुक्तम् -

> " अपारे काव्यसंसारे कविरेकः प्रजापतिः
> यथास्मै रोचते विश्वं तथेदं परिवर्तते" (ध्वन्यालोकः)

तत्कालिदासप्रसङ्गेऽतीव युक्तियुक्तं प्रतिभाति।

**Reference**


1. Vikramorvashiyam - kalidas, Editon – sri Rajendranath vidyabhusan, Basumati sahitya vidyamandir, Kolkata, 1336
2. Malavikagnimitram - kalidas, Editon – sri Rajendranath vidyabhusan, Basumati sahitya vidyamandir, Kolkata, 1336
3. Abhijnana shakuntalam- kalidas, Edition-Anil Chandra Basu, Sanskrit book depot, Kolkata,2012
4. Dasharupak –Dhanamjaya – Edition- George C.O Hass, Columbia university press, New York, 1912
5. Dhanyalok – Anandavardhan-Edition – Dr,nagendra,acharya vishweshwar sidhhanta shiromani, **ज्ञानमण्डल लिमिटेड्, वाराणसी, संवत् २०४२ वि०**